# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ८०

श्रुत्वा किम्पुरुषोत्पत्तिं लक्ष्मणो भरतस्तदा ।
आश्चर्यमिति चाब्रूतामुभौ रामं जनेश्वरम् ॥१॥

अथ रामः कथामेतां भूय एव महायशाः ।
कथयामास धर्मात्मा प्रजापतिसुतस्य वै ॥२॥

सर्वास्ता विद्रुता दृष्ट्वा किंनरीरृषिसत्तमः ।
उवाच रूपसम्पन्नां तां स्त्रियं प्रहसन्निव ॥३॥

सोमस्याहं सुदयितः सुतः सुरुचिरानने ।
भजस्व मां वरारोहे भक्त्या स्निग्धेन चक्षुषा ॥४॥

तस्य तद्वचनं श्रुत्वा शून्ये स्वजनवर्जिता ।
इला सुरुचिरप्रख्यं प्रत्युवाच महाग्रहम् ॥५॥

अहं कामकरी सौम्य तवास्मि वशवर्तिनी ।
प्रशाधि मां सोमसुत यथेच्छसि तथा कुरु ॥६॥

तस्यास्तदद्भुतप्रख्यं श्रुत्वा हर्षसमन्वितः ।
स वै कामी सह तया रेमे चन्द्रमसः सुतः ॥७॥

बुधस्य माधवो मासस्तामिलां रुचिराननाम् ।
गतो रमयतोऽत्यर्थं क्षणवत्तस्य कामिनः ॥८॥

अथ मासे तु सम्पूर्णे पूर्णेन्दुसदृशाननः ।
प्रजापतिसुतः श्रीमाञ्शयने प्रत्यबुध्यत ॥९॥

सोऽपश्यत्सोमजं तत्र तप्यन्तं सलिलाशये ।
ऊर्ध्वबाहुं निरालम्बं तं राजा प्रत्यभाषत ॥१०॥

भगवन्पर्वतं दुर्गं प्रविष्टोऽस्मि सहानुगः ।
न च पश्यामि तत्सैन्यं क्व नु ते मामका गताः ॥११॥

तच्छ्रुत्वा तस्य राजर्षेर्नष्टसंज्ञस्य भाषितम् ।
प्रत्युवाच शुभं वाक्यं सान्त्वयन्परया गिरा ॥१२॥

अश्मवर्षेण महता भृत्यास्ते विनिपातिताः ।
त्वं चाश्रमपदे सुप्तो वातवर्षभयार्दितः ॥१३॥

समाश्वसिहि भद्रं ते निर्भयो विगतज्वरः ।
फलमूलाशनो वीर वस चेह यथासुखम् ॥१४॥

स राजा तेन वाक्येन प्रत्याश्वस्तो महायशाः ।
प्रत्युवाच शुभं वाक्यं दीनो भृत्यजनक्षयात् ॥१५॥

त्यक्ष्याम्यहं स्वकं राज्यं नाहं भृत्यैर्विना कृतः ।
वर्तयेयं क्षणं ब्रह्मन्समनुज्ञातुमर्हसि ॥१६॥

सुतो धर्मपरो ब्रह्मञ्ज्येष्ठो मम महायशाः ।
शशबिन्दुरिति ख्यातः स मे राज्यं प्रपत्स्यते ॥१७॥

न हि शक्ष्याम्यहं गत्वा भृत्यदारान्सुखान्वितान् ।
प्रतिवक्तुं महातेजः किं चिदप्यशुभं वचः ॥१८॥

तथा ब्रुवति राजेन्द्रे बुधः परममद्भुतम् ।
सान्त्वपूर्वमथोवाच वासस्त इह रोचताम् ॥१९॥

न सन्तापस्त्वया कार्यः कार्दमेय महाबल ।
संवत्सरोषितस्येह कारयिष्यामि ते हितम् ॥२०॥

तस्य तद्वचनं श्रुत्वा बुधस्याक्लिष्टकर्मणः ।
वासाय विदधे बुद्धिं यदुक्तं ब्रह्मवादिना ॥२१॥

मासं स स्त्री तदा भूत्वा रमयत्यनिशं शुभा ।
मासं पुरुषभावेन धर्मबुद्धिं चकार सः ॥२२॥

ततः स नवमे मासि इला सोमसुतात्मजम् ।
जनयामास सुश्रोणी पुरूरवसमात्मजम् ॥२३॥

जातमात्रं तु सुश्रोणी पितुर्हस्ते न्यवेशयत् ।
बुधस्य समवर्णाभमिलापुत्रं महाबलम् ॥२४॥

बुधोऽपि पुरुषीभूतं समाश्वास्य नराधिपम् ।
कथाभी रमयामास धर्मयुक्ताभिरात्मवान् ॥२५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com